**BACHELOR OF ARTS EXAMINATION, 2024**

**(1st Year, 1st Semester )**

**SANSKRIT (HONOURS)**

**COURSE : I**

**[ Epice & Prose Literature ]**

*Time* : 2 Hours *Full Marks* : 30

*The figures in the margin indicate full marks.*

**1.** हनुमता सह रामस्य कुत्र मेलनमभवत्? हनुमतः लङ्काभिगमनं स्वकीयभाषया वर्णनं देयम्। 1+4=5

**( अथवा )**

'गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम्।' कमुद्दिश्य कस्य वचनमेतत्? अत्र गृध्रस्य नाम किम्? केन गृध्रः हतः? केन च दृष्टः? दर्शानादनन्तरं श्रवणादनन्तरं वा तेन किं कृतम्?
½+½+½+½+3=5

**2.** सुरगिरा देवनागरीं लिपिमाश्रित्य **पञ्च** प्रश्नाः समाधेयाः – 1×5=5

(क) भरद्वाजेन सह रामः कुत्र मिलितोऽभवत्?

(ख) सीतायाः रामानुगमनं केन सह उपमीयते?

(ग) कासीत् शवरी? तस्याः नाम किम्?

(घ) क आसीत्कबन्धः? तस्य स्वरूपं किम्?

(ङ) सीता किमर्थ ज्वलनं विवेश?

(च) पुप्लुवे, हरीश्वरः इति पदयोः अर्थौ लेखनीयौ।

**3.** कदा विजिगीषोर्यानं कार्यम्? यानस्य स्वरूपं विचार्यताम्। 1+4=5

**( अथवा )**

भृत्यं प्रति स्वामिनः सुरक्तेः विरक्तेश्च चिह्नानि हितोपदेशानुसारं लेख्यानि। 5

**4.** सुरगिरा देवनागरीलिपिमाश्रित्य **पञ्च** प्रश्नाः समाधेयाः – 1×5=5

(क) उपायचतुष्टयस्य नामानि लेख्यानि।

(ख) बलेनावध्याः शत्रवः केन प्रकारेण वध्याः भवेयुः?

(ग) कापुरुषस्य लक्षणं किम्?

(घ) पण्डितस्य किं स्वरूपं हितोपदेशे उक्तम्?

(ङ) युद्धे कस्य दुर्गस्य प्राशस्त्यं विहितम्।

(च) जीवस्य जीवितं कथं सफलं भवितुमर्हति?





**5.** 'पापे भजस्व लोहजातिमजातचैतन्या सती।'— कां प्रति कस्य च इयमुक्तिः? भजस्व–इत्यस्य पर्यायशब्दो दीयताम्। वाक्येऽस्मिन् वर्णितः शापवृत्तान्तो व्याख्यायताम्। 1+1+3=5

**( अथवा )**

'अवसितश्च ममाद्य शापः। तच्च मासद्वयं तव पारतन्त्र्यम्।' कमुद्दिश्य कस्याः च इयमुक्तिः? कदा एवमुक्तम्? वाक्येऽस्मिन् वर्णितः शापवृत्तान्तः स्पष्टीकरणीयः। 1+1+3=5

**6.** केचन **पञ्च** प्रश्नाः सुरगिरा समाधेयाः – 1×5=5

(क) क आसीद् एण्जङ्घः? स कुत्र तपस्यामकरोत्?

(ख) 'देवदृष्टिप्रदानेनानुगृह्यतामयमाज्ञाकरः।' कमुद्दिश्य कस्य च इयमुक्तिः?

(ग) वीरशेखरस्य पितुर्नाम किम्? तस्य पितृप्रयुक्तवैरिता केन सह आसीत्?

(घ) चण्डपोतः क आसीत्?

(ङ) 'आत्मसात्कृता च तेनाहमासम्' कस्या इयमुक्तिः? तेन पदेनात्र कः सूचितः?

(च) चम्पेश्वरस्य नाम किम्? तस्य कन्याया अपि नामलिख्यताम्।

★★★